# Shri Ganga Kavacham

# શ્રીગઙ્ગાકવચમ્

## Document Information

Text title : Gangakavacha 4

File name : gangAkavacham4.itx

Category : devii, nadI, kavacha, devI

Location : doc_devii

Transliterated by : NA

Proofread by : NA

Description-comments : Vishnuyamala tantra

Latest update : August 28, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2020

*sanskritdocuments.org*

# Shri Ganga Kavacham

# શ્રીગઙ્ગાકવચમ્

ૐ શ્રીગણેશાય નમઃ ।

ૐ ગઙ્ગાયૈ નમઃ ।

વિનિયોગઃ -

ગઙ્ગાકવચસ્ય વિષ્ણુરૃષિવિરાટ્છન્દઃ

ચતુર્દશ પુરુષ ઉદ્ધારણ અર્થે પાઠે વિનિયોગઃ ।

ૐ દ્રવ્યરૂપા મહાભાગા સ્નાને ચ તર્પણેઽપિ ચ ।

અભિષેકે પૂજને ચ પાતુ માં શુક્લરુપિણી ॥ ૧॥

વિષ્ણુપાદપ્રસૂતાસિ વૈષ્ણવી નામધારિણી ।

પાહિ માં સર્વતો રક્ષેદ્ગઙ્ગા ત્રિપથગામિની ॥ ૨॥

મન્દાકિની સદા પાતુ દેહાન્તે સ્વર્ગવલ્લભા ।

અલકનન્દા ચ વામભાગે પૃથિવ્યાં યા તુ તિષ્ઠતિ ॥ ૩॥

ભોગવતી ચ પાતાલે સ્વર્ગે મન્દાકિની તથા ।

પઞ્ચાક્ષરમિમં મન્ત્રં યઃ પઠેચ્છૃણુયાદપિ ॥ ૪॥

રોગી રોગાત્પ્રમુચ્યેત્બદ્ધો મુચ્યેત બન્ધનાત્ ।

ગુર્વિણી જનયેત્ પુત્રં વન્ધ્યા પુત્રવતી ભવેત્ ॥ ૫॥

ગઙ્ગાસ્મરણમાત્રેણ નિષ્પાપો જાયતે નરઃ ।

યઃ પઠેદ્ગૃહમધ્યે તુ ગઙ્ગાસ્નાનફલં લભેત્ ॥ ૬॥

સ્નાનકાલે પઠેદ્યસ્તુ શતકોટિફલં લભેત્ ।

યઃ પઠેત્પ્રયતો ભક્ત્યા મુક્તઃ કોટિકુલૈઃ સહ ॥ ૭॥

॥ ઇતિ શ્રીવિષ્ણુયામલે શિવપાર્વતીસંવાદે ગઙ્ગાકવચં સમ્પૂર્ણમ્ ।

*Shri Ganga Kavacham*

pdf was typeset on August 28, 2020

Please send corrections to *sanskrit@cheerful.com*